# Shri Dattatreya Kavacha Stotram

# શ્રીદત્તાત્રેયકવચસ્તોત્રમ્

## Document Information

Text title : Dattatreya Kavacha Stotram

File name : dattAtreyakavachastotram.itx

Category : kavacha, deities_misc, dattAtreya

Location : doc_deities_misc

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Description-comments : The kavacham is listed in Dattareya Kalpa, referring as from Brahmanda Purana (not verified)

Latest update : October 2, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2026

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયકવચસ્તોત્રમ્

વિનિયોગઃ -
અસ્ય શ્રીદત્તાત્રેયકવચસ્તોત્રમહામન્ત્રસ્ય નારાયણ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીદત્તાત્રેયો દેવતા । દ્રાં બીજમ્ ।
ક્લીં શક્તિઃ । સ્વાહા કીલકમ્ ।
શ્રીદત્તાત્રેયપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

અથ કરહૃદયાદિન્યાસઃ -
ૐ દ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ દ્રીં તર્જનીભ્યાં નમઃ ।
ૐ દ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ દ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ દ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ દ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

ૐ દ્રાં હૃદયાય નમઃ ।
ૐ દ્રીં શિરસે સ્વાહા ।
ૐ દ્રૂં શિખાયૈ વષટ્ ।
ૐ દ્રૈં કવચાય હુમ્ ।
ૐ દ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ દ્રઃ અસ્ત્રાય ફટ્ ॥

ઇતિ કરહૃદયાદિન્યાસઃ ॥

અથ ધ્યાનમ્ -
દત્તાત્રેય હરેકૃષ્ણ ઉન્મત્તાનન્દદાયક ।
દિગમ્બરમુને બાલાપિશાચ જ્ઞાનસાગર ॥

અથ પઞ્ચોપચારપૂજા -
લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।

હં આકાશાત્મને પુષ્પં સમર્પયામિ ।
યં વાય્વાત્મને ધૂપં સમર્પયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને નૈવેદ્યં નિવેદયામિ ।
સં સર્વાત્મને તામ્બૂલાદિસર્વોપચારાન્ સમર્પયામિ ॥

અથ શ્રીદત્તાત્રેયકવચમ્ ।

ૐ ભક્તાશ્રયઃ શિરઃ પાતુ લલાટં મુનિશેખરઃ ।
યોગીશ્વરો દૃશૌ પાતુ ત્રૈલોક્યસ્યપ્રિયઃ શ્રવિઃ ॥ ૧॥

કપોલૌ મુનિરાજેન્દ્રઃ મુખં પાતુ કુમારકઃ ।
જિહ્વાં મે પાતુ મન્ત્રાત્મા કણ્ઠં વિષ્ણુસ્વરૂપકઃ ॥ ૨॥

સ્કન્ધૌ કપિલવર્ણશ્ચ દત્તાત્રેયો ભુજૌ તથા ।
કર્ણૌ તુ તાપસો નિત્યં હૃદયરાજયોગવિત્ ॥ ૩॥

વક્ષો મે હઠયોગી ચ સ્તનો મે નાદયોગવિત્ ।
પાર્શ્વે તુ યોગરાજેન્દ્ર કુક્ષિં મે યોગવાન્ પ્રભુઃ ॥ ૪॥

મધ્યં પાતુ તેજસ્વી નાભિં મે જૃમ્ભયોગિરાટ્ ।
કટિં પિઙ્ગલયોગી ચ યોગીશો જઘનં મમ ।
ગુહ્યં મે કર્મયોગી ચ તન્મૂલં તત્ત્વયોગવિત્ ॥ ૫॥

ઊરૂ પરમહંસશ્ચ જાનુની બિન્દુયોગવિત્ ।
જઙ્ઘે જટાધરઃ પાતુ ગુલ્ફૌ મે શિવયોગવાન્ ॥ ૬॥

પાદૌ મે વિષ્ણુયોગી ચ પૂર્વાઙ્ગં બ્રહ્મયોગવિત્ ।
અપરાઙ્ગં સદા રક્ષેદ્ દત્તાત્રેયો મુનિસ્તથા ।
સર્વાઙ્ગાનિ સદા રક્ષેદ્ દત્તાત્રેયો ઋષીશ્વરઃ ॥ ૭॥

પૂર્વસ્યાં દિશિ મે પાત્વષ્ટાઙ્ગયોગાભ્યાસવિત્ ।
આગ્નેય્યાં પાતુ યોગીશો યામ્યાં મે નિગમપ્રિયઃ ॥ ૮॥

નૈરૃત્યાં પાતુ વિશ્વેશઃ સદા ષટ્કર્મયોગવિત્ ।
વારુણ્યાં દિશિ પાર્શ્વે તુ પાતુ મે મુનિપુઙ્ગવઃ ॥ ૯॥

કૌબેર્યાં તથૈશાન્યાં પાતુ મે સર્વામરપ્રિયઃ ।
અનસૂયાસુતો રક્ષેદૂર્ધ્વં ત્વધરમેવ ચ ॥ ૧૦॥

પઠને શ્રવણે ચૈવ ગિરિગહ્વરેષુ ચ ।
અશ્વારોહે ગજારોહે ચાન્દોલિકે તથા ।
વૃક્ષારોહે શિલારોહે યુદ્ધે ભુવિ રસાતલે ॥ ૧૧॥

ઉદ્યાને વનવાસે ચ આસને જપે તથા ।
બાહ્યાભ્યન્તરકાલેષુ સર્વં રક્ષેચ્ચ ઈશ્વરઃ ॥ ૧૨॥

શઙ્ખચક્રકુઠારાદ્યાયુધેભ્યસ્ત્રિસન્ધ્યયા ।
સર્વરક્ષાકરો રક્ષેત્ કાર્તવીર્યપ્રિયઙ્કરઃ ॥ ૧૩॥

બ્રહ્મરાક્ષસભેતાલકૂષ્માણ્ડરાક્ષસાદયઃ ।
પિશાચા ડાકિનીભૂતા શાકિનીબાલકગ્રહાઃ ।
સર્વભૂતહિતાર્થાય સદા રક્ષેન્મહામુનિઃ ॥ ૧૪॥

ઉદયે ચાસ્તમાને ચ મધ્યાહ્ને સાર્વકાલિકે ।
દિવારાત્ર્યોર્નિશાયાં ચ રક્ષેત્સર્વવરપ્રદઃ ॥ ૧૫॥

દત્તાત્રેયસ્ય કવચં યઃ પઠેત્ પ્રિયતો નરઃ ।
આયુરારોગ્યસિદ્ધિં ચ ઐશ્વર્યમધિકં તથા ॥ ૧૬॥

જ્ઞાનવૈરાગ્યસિદ્ધિં ચ યઃ પઠેત્ સ્તોત્રસહસ્રકમ્ ।
સ્વાતન્ત્ર્યં ચ ભવેન્નરાણાં સર્વકામાર્થસાધકમ્ ॥ ૧૭॥

ધારયેત્ સુપુષ્કરયોગકાલે પઠેન્નરઃ ।
પુત્રપૌત્રં ચ યન્નિત્યં ફલમેતન્ન સંશયઃ ॥ ૧૮॥

ઇતિ બ્રહ્માણ્ડપુરાણે બ્રહ્મનારાયણસંવાદે
શ્રીદત્તાત્રેયકવચસ્તોત્રં સમ્પૂર્ણમ્ ॥

From shrIdattAtreyakalpaH

Encoded and proofread by Durga Sharma

*Shri Dattatreya Kavacha Stotram*

pdf was typeset on October 2, 2026

Please send corrections to *sanskrit@cheerful.com*